Volume-01
Issue-06
June-2019

ISSN: 2663-0931(Print)
ISSN: 2663-2594(online)
International Journal of
Interdisciplinary Current Advanced Research
www.ijicar.in

# समावेशात्मकशिक्षायां छात्राणां समस्याः परिहाराश्च

[1]Mrityunjoy Chakraborty

*1 Education Department,Tanmoy College of Higher Education,Sindrani, N-24 parganas, India.
Note: * Indicates corresponding author

ARTICLE DETAILS

Article History:
Received Date: 16/06/2019
Revised Date: 20/06/2019
Accepted Date: 26/6/2019
e-First: 28/06/2019

Keywords

*Corresponding Author
(1Mrityunjoy Chakraborty)

ABSTRACT

मनुष्येषु परस्परं भिन्नता स्वाभाविकी भवति। वस्तुतः अस्मिन् जगति कौ अपि द्वौ मानवौ पूर्णरूपेण समानौ न भवतः। अनेन कारणेन कस्मिन्नपि विद्यालये कक्ष्यायां वा शिक्षां प्राप्तुम् आगताः छात्राः, शारीरिक- मानसिक- सामाजिक- आर्थिक- संवेगात्मकदृष्ट्या भिन्नाः इति दृश्यन्ते। यद्यपि केचन छात्राः तीव्राः बुद्धियुक्ताः, केचन मन्दबुद्धियुक्ताः भवन्ति। केचन विभिन्नप्रकारैः शारीरिकदोषैः युक्ताः भवन्ति, एवञ्च केचन बालकाः समस्यास्पदाः भवन्ति। एते बालकाः विशिष्टाः इति अभिधीयन्ते। एतेषां कृते या शिक्षा कल्पिता, सा विशिष्टा शिक्षा इति उच्यते।

## 1. Introduction

विशिष्टाभिः बालक-बालिकाभिः सह सामान्य-बालक-बालिकानां शिक्षापद्धतिः ''समावेशात्मकशिक्षा'' इति नाम्ना ज्ञायते।

शिक्षा छात्राणां मूलाधिकारः भवति। स्थानं, जातिः, धर्मः, संस्कृतिः, लिङ्गं, वर्गः, दिव्याङ्गता इत्यादीनामाधारे कीदृशोऽपि भेद-भावो नाङ्गीकार्यः।

तत्र 1989 इत्यस्मिन् युगाब्दे संयुक्तराष्ट्रसङ्घे ''बालानाम् अधिकारः'' (The united nations convention on the rights of the child.) विषयेऽस्मिन् सम्मेलनमजात, यत्र विशेषतः अयमेव निष्कर्षो लब्धो यत् बालैः सह कीदृशोऽपि भेदभावः अमानवीयोऽस्ति।

भारतस्य संविधानेऽपि 15,42,45 इत्येतेषु त्रिषु अनुच्छेदेषु भेदभावेन विना सर्वेषां शिक्षायाः प्रावधानं विहितमस्ति। 1995 मिते वर्षे निश्शक्तव्यक्ति- अधिनियमस्य (Person with Disability Act.) प्रावधानेन शिक्षायां विशेषजनानामपि समानोऽधिकारः समारब्धः। 2002 तमे वर्षे सर्वशिक्षाऽऽभियानस्य आयोजनकाले सर्वविधबालकानां शिक्षायां चिन्तनं कुर्वता भारतीयशासनेन समावेशात्मक- शिक्षायां तदीयशिक्षकेषु तदीयशिक्षणे च मूर्तरूपेण कार्यं विधातुम् अधोलिखित- निश्चयाः विहिताः-

1. सर्वेऽपि बालाः युवानश्च अधिगन्तुं प्रभवन्ति, किन्तु तेभ्यः आलम्बनं(Support) अपेक्ष्यते।
2. सर्वेऽपि बालाः येन केनापि प्रकारेण भिद्यन्ते, अतः तेषाम् अधिगमसम्बद्धावश्यकताः अपि भिद्यन्ते। सा एषा भिन्नतैव अस्मदर्थं मूल्यवती वर्तते।

© IJICAR 2019, All Rights Reserved 

3. पाठ्यक्रमे सर्वेषां सहभागिता अपेक्ष्यते।

4. सर्वविधरूपेण अभिवृत्तिषु, व्यवहारेषु, शिक्षणविधिषु, पाठ्यक्रमे पर्यावरणे च परिवर्तनं स्यात्।

5. व्यक्तिगतसामर्थ्यं परिवर्द्ध्य अधिगतृणां सशक्तीकरणे अवधानं विधातव्यम्।

इतोऽपि कानिचन उद्देश्यानि सन्ति- तानि-

6. छात्रेषु विशिष्टानां छात्राणां संज्ञानम् एवञ्च तेषाम् असमर्थतां ज्ञात्वा तस्य परिहारस्य उपायस्य अन्वेषणम्।

7. विशिष्टेषु बालकेषु आत्म- निर्भरशीलं निर्माय तान् समाजस्य मुख्यधारया सह मेलनं योजनं वा।

8. लोकतान्त्रिकमूल्यानाम् उद्देश्यं प्राप्तुम्।

9. जागरूकतायाः भावनायाः विकासाय।

10. बालकेषु विशिष्येषु आत्मनिर्भरस्य भावनायाः विकासाय।

11. समावेशात्मकशिक्षायां कापि व्यक्तिः शिक्षायाः उपेक्षिता न स्यात्- इति सुनिश्चितं करोति इयं शिक्षा।

12. कोऽपि बालकः शारीरिक- अपंगतायुक्तः भवतु तथापि शिक्षायाः समानावसरात् सः वञ्चितः न स्यात्। तस्य आङ्गनबाडी विद्यालयीयशिक्षा च उभयत्र कापि बाधा न भवेत्।

13. शारीरिक- मानसिकदृष्ट्या अक्षमानां कृते पाठयितुं लेखयितुं च शैक्षिकसंस्थानां विशेषव्यवस्था करणीया। एतादृशानां योग्याध्यापकानां नियुक्तिः स्यात् ये विशिष्टान् बालकान् सरलतया, समीचीनतया शिक्षयितुं समर्थाः स्युः।

14. अस्या शिक्षायाम् अन्तर्गतानां शैक्षिकसंस्थानां कर्तव्यं भवति यत् सुनिश्चितरूपेण छात्रावासस्य प्रबन्धनम्।

भारते समाजकल्याणविभागपक्षतः 1974 तमे युगाब्दे प्रवर्तिता विकलाङ्गबालकानां कृते एकीकृता योजना (Integrated Education for Disability children.) 1982-83 मिते वर्षे शिक्षाविभागाय दस्तान्तरिता। एतस्याः योजनायाः स्थाने 2009-10 तमे वर्षे माध्यमिकस्तरे निश्शक्तजनसमावेशात्मक- शिक्षायोजना (Inclusive Education of the Disability at secondary stage) इत्येषा योजना समारब्धा। ततः 2013 तमे वर्षे सैषा योजना राष्ट्रियमाध्यामिक शिक्षाऽभियाने (RMSA) अन्तर्भाविता।

सर्वासु अपि आसु योजनासु बालानामधिकारं दृष्टिगतं निधाय लोकतन्त्रीयभावनया समावेशात्मकशिक्षायै महत्त्वमाचर्य मतं यत् कस्मिंश्चिदपि आधारे कीदृशमपि बालकं समाजस्य मुख्यधारातः पृथक्करणस्य प्रयासः पूर्णतः अन्यायासक्तोऽस्ति। बालानां स्वाभाविकविकासाय सामाजिकं पर्यावरणम् अत्यन्तम् आवश्यकमस्ति, यत्र ते सामाजिकान्तः क्रियां विधाय आत्मनः पूर्णसामाजिकविकासं कृत्वा आत्मानं दीनभावेभ्यो वारयेयुः।

समावेशात्मकशिक्षायाः स्पष्टीकरणावसरे 2009 तमे वर्षे Policy Guidelines on Inclusion in Education. इत्यस्मिन् नियामकग्रन्थे संयुक्तराष्ट्रसङ्घेन कथितम्-

UNESCO- Inclusion is increasingly understood more broadly as a reform that supports and welcomes diversity amongst all learners.

2016 तमे वर्षे आयोजिते पञ्चदशे पैरालम्पिक- क्रीडास्पर्धायां दिव्याङ्गानां प्रशंसनीयप्रदर्शनेन इदं स्पष्टीकृतं यत् यदि एतेषां कृते पर्याप्तसुविधाः प्रकल्प्यन्ते, तर्हि एते केभ्यश्चिदपि हीनतराः न सन्तीति। साम्प्रतं शासनेनापि विषयेऽस्मिन् विशिष्टमवधानं प्रदीयते।अभिभावकैः, समाजशास्त्रिभिः, प्रभासकैः, शिक्षकैश्च सर्वैरपि

© IJICAR 2019, All Rights Reserved 

विषयेऽस्मिन् विशेषो यत्नो विधातव्यः। तत्रापि शिक्षकस्य विशिष्टम् उत्तरदायित्वमस्ति यतो हि छात्रेण सह प्रत्यक्षरूपेण सम्बद्धो भवति। अस्यां समावेशात्मकशिक्षायां छात्राणां काश्चन समस्याः तासां परिहाराश्च विचार्यन्ते।

1. शारीरिकाक्षमता–(Physical Disability)- पादयोः अक्षमता कारणेन चलने क्लेशो भवति चेत् (Wheel chair) चक्रासनम् उपकरणत्वेन दानव्यम्। तस्य सञ्चालनाय अनुकुलतया(Ramp) सोपानादिषु मार्गः कल्पनीयः।
2. हस्तयोः अभावे कृत्रिम हस्त-पादादीनां संयोजनम्।(Modern Technology) आधुनिक प्रविधिविज्ञानस्य उपयोगेन लेखनादीनां शिक्षणं कर्तव्यम्।
3. कर्णस्य श्रवणशक्तेः न्यूनतायां श्रवणयन्त्रस्य उपयोगः कर्तव्यः।
4. दर्शनशक्तेः न्यूनतयाम् उपनेत्रस्य उपयोगः करणीयः।
5. भाषणशक्तेः अभावे सङ्केतद्वारा वा लेखनद्वारा अभिव्यक्तिं कर्तुम् उपायाः बोधनीयाः।
6. (मन्दबुद्धि) समावेशात्मक विद्यालये तादृशाः विशिष्टाः अध्यापकाः भवेयुः। ये छात्राणां मानसिक- वैकल्यं, बुद्धिमान्द्यम्, च ज्ञात्वा तदुनुकुलतया पाठयितुं योग्याः स्यूः।
7. SC,ST,OBC प्रभृतीनां दुबलवर्गाणां दरिद्राणां च समावेशात्मकविद्यालये सर्वकारशिक्षानीत्या प्रवेशः निश्चितः स्यात्।

**निष्कर्षः**

विद्यालयः समाजस्य प्रतिबिम्बः भवति , कश्चन लघु समाजःभवति । अतः समाजे विद्यमानानां सर्वविधानां बालकानां सामाजिक विकासाय सर्वविध अमतानां विकासाय च विद्यालये यथोचितं वातावरणं भवेत् । विशिष्टानाम् उपकरणानां विषिष्टानां अध्यापकानाञ्च समावेशेन समावेशितविद्यालयः निश्चितं शिक्षालक्ष्यं प्राप्नुयात् ।

© IJICAR 2019, All Rights Reserved 